Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

No. of Printed Pages – 3

VU–53–Nim. Dar.

# वरिष्ठ उपाध्याय परीक्षा, 2017

## निम्बार्क दर्शनम्

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

1) द्वैताद्वैतसिद्धान्ते कीदृशं ब्रह्मस्वरूपं स्वीकृतम्? [1]

2) भगीरथझामहोदय: कुत्र निवसति स्म? [1]

3) वेदान्तकौस्तुभभाष्यकार: क:? [1]

4) निम्बार्कमते पदार्थ: कतिविध: ? नामान्यपि लिखत। [2]

5) कालस्वरूपं किम्? [2]

6) निम्बार्काचार्य: कस्य अवतार आसीत्? [2]

7) आश्रमस्थाने मृगा: शशकाश्च किं कुर्वन्ति? [2]

8) अरूणमहर्षिणा कथं व्रजयात्राया उपक्रम: समायोजित:? [2]

9) औदुम्बराचार्य: क:? तेन क: शास्त्रार्थे पराजित? [2]

10) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन .......श्लोकोऽयं पूरयत। [2]

11) संकरोत्पत्तिफलं किं भवति? [2]

12) देहान्तरप्राप्तौ धीर: किं करोति? [2]

13) देही कथं नवानि शरीराणि संयाति? [2]

14) भेदाभेदसिद्धान्ते भेद: भावरूपतया वा अभावरूपतया सम्मत:? ग्रन्थोक्तदिशा निरूपणीय: । [4]

15) ब्रह्मण: सविशेषत्वं निर्विशेषत्वं च द्वैताद्वैतविवेकरीत्या साधनीयम्। [4]

16) अधोनिर्दिष्ट श्लोकस्य सप्रसङ्गभावार्थं लिखत। [1 + 3 = 4]
तस्मान्नभिन्नं नाभिन्नमाभिर्भिन्नो न वै विभु:
भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिनाम्।

17) अधोलिखितश्लोकस्य सप्रसङ्गव्याख्या करणीया – [1 + 5 = 6]

गुणेष्वाविशते चेतो गुणाश्चेतसिच प्रभो !
कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षो: ।

अथवा

महर्षिसनकादिकानां जिज्ञासा भगवता श्रीकृष्णेन केन प्रकारेण समाधानं कृतम, वर्णनीयम्।

18) पुरा भारतवर्षे ऋषीणामाश्रमा: कीदृशा भवन्ति स्म, ग्रन्थानुसारं वर्णयत। [6]

अथवा

केन कारणेन ऋषिमुनीश्वरा: परीक्षिन्महाराजस्य सन्निधौ समुपात्रता: ?

19) निम्नांकितयो: श्लोकयो एकस्य सप्रसङ्गव्याख्या विधेया – [1 + 5 = 6]

यद्यदाचरति श्रेष्ठ स्तत्तदेवेतरो जन:
स यत्प्रमाणं कुरूते लोकस्तदनुवर्तते।

अथवा

तत्त्ववित्तु महाबाहो गुणकर्मविभागयो:
गुणा गुणेषु वर्तन्त इति मत्त्वा न सज्जते।

20) निम्नांकितयो: श्लोकयो एकस्य तात्पर्यार्थं विवेचयत – [6]

विषया विनिवर्तन्ते निराहारस्य देहिन:
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते।

अथवा

यततो ह्यपि कौन्तेय पुरूषस्य विपश्चित:
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मन:।

21) द्वैताद्वैतविवेकानुसारं कालप्राकृतयोरपि ब्रह्मात्मकत्वात्तादात्म्यं साधनीयम्। [7]

अथवा

निम्बार्कमते समग्रब्रह्मस्वरूपं किम्, यथाशास्त्रं निरूपणीयम्।

22) शास्त्रप्रमाणं निर्दिश्य अचित्पदार्थं निरूपयत। [7]

23) चिदचितो: स्वतन्त्रसत्तापरतन्त्रसत्तात्मकत्वं विवेचनीयम् । [7]

अथवा

''पृथगात्मानं प्रेरितारञ्च मत्वा'' ''द्वा सुपर्णा सयुजा सखाया'' इत्यादि भेदवाक्यै: पदार्थस्वरूपं विधीयते तादात्म्यं वा प्रतिषिध्यत इति यथाशास्त्रं निर्णीयताम् ।

DO NOT WRITE ANYTHING HERE